# ॥ नृसिंहाष्टकम्॥

भूखण्डं वारणाण्डं परवरविरटं डम्पडम्पोरुडम्पम् ।
डिंडिंडिंडिंडिडिम्बं दहमपि दहमैर्झम्पझम्पैश्चझम्पैः ॥
तुल्यास्तुल्यास्तुतुल्याः धुमधुमधुमकैः कुङ्कुमाङ्कैः कुमाङ्कैः ।
एतत्ते पूर्णयुक्तं अहरहकरहः पातुमां नारसिंहम् ॥१॥

भूभृङ्भृङ्गुजङ्गं प्रळयरवरवम्प्रज्वलद् ज्वालमालम् ।
खर्जर्ज खर्जदुर्ज खखचखचखचित्खर्जदुर्जर्जयन्तम् ॥
भूभागं भोगभागं गगगगगनं गर्दमत्युग्रगण्डम् ।
स्वच्छं पुच्छं स्वगच्छं स्वजनजननुतः पातुमां नारसिंहम् ॥२॥

एनाभ्रं गर्जमानं लघुलघुमकरो बालचन्द्रार्कदम्ष्ट्रो ।
हेमाम्भोजं सरोजं जटजटजटिलोजाड्यमानस्तुभीतिः ॥
दन्तानां बाधमानां खगटखगटवो भोजजानुस्सुरेन्द्रोः ।
निष्ट्रत्यूहं सराजा गहगह गहतः पातुमां नारसिंहम् ॥३॥

शङ्खं चक्रञ्च चापं परशुमशमिषं शूलपाशाङ्कुशास्त्रम् ।
बिभ्रन्तं वज्रखेटं हलमुसलगदाकुन्त्यमत्युग्रदम्ष्ट्रम् ॥
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषम् ।
वन्दे प्रत्येकरूपं परपदनिवसः पातुमां नारसिंहम् ॥४॥

पादद्वन्द्वं धरित्रीकटिविपुलतरो मेरुमध्यूढ्वमूरुम् ।
नाभिर्ब्रम्हाण्डसिन्धुः हृदयमपिभवोभूतविद्वत्समेतः ॥
दुश्चक्राङ्कं स्वबाहुं कुलिशनखमुखं चन्द्रसूर्याग्नि नेत्रम् ।

वक्त्रं वन्हिस्सुविद्युत्सुरगणविजयः पातुमां नारसिंहः ॥ ५ ॥

नासाग्रं पीनगण्डं परबलमथनं बद्धकेयूरहारम् ।
रोउद्रं दम्ष्ट्राकरालं आमितगुणगणं कोटिसूर्याग्निनेत्रम् ॥
गाम्भीर्यं पिङ्गलाक्षं भ्रुकुटितविमुखं शोडशार्धार्धबाहुम्[1] ।
वन्दे भीमाट्टहासं त्रिभुवनविजयः पातुमां नारसिंहः ॥ ६ ॥

केके नृसिंहष्टके नरवरसदृशं देवभीत्वं गृहित्वा ।
देवन्द्यो विप्रदन्दं प्रतिवचन पयायांयन प्रत्यनैषीः ॥
शापं जापञ्च खड्गं प्रहसितवदनं चक्रचक्रीचकेन ।
ॐइत्येदैत्यनादं प्रकचविविदुषा पातुमां नारसिंहः ॥ ७ ॥

झंझंझंझंझकारं झषझषझषितं जानुदेशं झकारम् ।
हुँहुँहुँहुँहुँ हुकारं हरित कहहसा यन्दिशे वं वकारम् ॥
वंवंवंवं वकारं वदनदलिततं वामपक्षं सुपक्षम् ।
लम्लम्लम्लं लकारं लघुवण विजयः पातुमां नारसिंहः ॥ ८ ॥

भूतप्रेतपिशाचयक्षगणशः देशान्तदुच्चाटना[2] ।
च्वोरव्याधिमहज्ज्वरं भयहरं[3] शत्रुक्षयं निश्चयम् ॥
सन्ध्याकाल जपन्तमष्टकमिदं सङ्गक्तिभूर्वादिभिः ।
प्रह्लादेव वरो वरस्तु जयिता सत्पूजितां भूतये ॥ ९ ॥

इति श्री विजयीन्द्रतीर्थविरचितं श्रीनृसिंहाष्टकं सम्पूर्णम्

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

[1] शोडशार्हार्धबाहुम्
[2] देशान्तरोच्चाटना
[3] विषहरम्